१

# इरावती

## नवमकक्षायाः संस्कृतस्य
## अधिगम-सामग्री (R3)

9317

© NCERT not to be republished

विद्ययाऽमृतमश्नुते
एनसीईआरटी
NCERT
राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

**9317–इरावती**
नवमकक्षायाः संस्कृतस्य अधिगम-सामग्री (R3)

**ISBN 978-93-5729-083-8**

**प्रथम संस्करण**
*जून 2026 ज्येष्ठ 1948*

**PD 50T BS**

***© राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद, 2026***

**सर्वाधिकार सुरक्षित**

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भी भाग को छापना तथा इलैक्ट्रॉनिकी, मशीनी, फ़ोटो प्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुन: प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रचारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशक की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

**रा.शै.अ.प्र.प. के प्रकाशन प्रभाग के कार्यालय**

एन.सी.ई.आर.टी. कैंपस
श्री अरविंद मार्ग
**नई दिल्ली 110 016** फ़ोन : 011-26562708

108 ए 100 फीट रोड
हेली एक्सटेंशन, होस्डेकेरे
बनाशंकरी III इस्टेज
**बेंगलुरु 560 085** फ़ोन : 080-26725740

नवजीवन ट्रस्ट भवन
डाकघर नवजीवन
**अहमदाबाद 380 014** फ़ोन : 079-27541446

सी.डब्ल्यू.सी. कैंपस
निकट धनकल बस स्टॉप पिनहटी
**कोलकाता 700 114** फ़ोन : 033-25530454

सी.डब्ल्यू.सी. कॉम्प्लैक्स
मालीगाँव
**गुवाहाटी 781021** फ़ोन : 0361-2676869

**₹ 80.00**

*80 जी.एस.एम. पेपर पर मुद्रित।*

सचिव, राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, श्री अरविंद मार्ग, नई दिल्ली 110 016 द्वारा प्रकाशन प्रभाग में प्रकाशित तथा सालासर इमेजिंग सिस्टम बी-19, सेक्टर-88, फेज-2, नोएडा, गौतमबुद्ध नगर, उत्तर प्रदेश-201305 द्वारा मुद्रित।

**प्रकाशन सहयोग**

| | | |
|---|---|---|
| अध्यक्ष, प्रकाशन प्रभाग | : | *एम.वी. श्रीनिवासन* |
| मुख्य संपादक | : | *बिज्ञान सुतार* |
| मुख्य व्यापार प्रबंधक | : | *अमिताभ कुमार* |
| मुख्य उत्पादन अधिकारी (प्रभारी) | : | *दीपक जैसवाल* |

**चित्रांकन एवं सज्जा**
*एरीज डिजाइनिंग स्टूडियो*

**आवरण**
*ग्रीन ट्री डिजाइनिंग स्टूडियो*

© NCERT not to be republished

# पुरोवाक्

राष्ट्रियशिक्षानीतिः–२०२० भारतीयपरिवेशे प्रतिष्ठितां तादृशीं शिक्षाव्यवस्थां परिकल्पयति, या भारतस्य समृद्धां सभ्यतागतपरम्परां ज्ञानपरम्पराञ्च सर्वेषु अध्ययनक्षेत्रेषु आधारत्वेन स्वीकरोति। विशेषतः भारतीयासु भाषासु दृढः आधारः शिक्षार्थिनां समग्राय भाषासामर्थ्यविकासाय सहायको भवति, एकविंशतिशताब्द्याः अवसरैः प्रत्याह्वानैश्च सह सार्थकरूपेण संलग्नतां साधयितुं विद्यार्थिनः समर्थान् च करोति। एषा नीतिः पाठ्यक्रमस्य सर्वेषु विषयेषु शैक्षणिकसफलतां प्राप्तुं भाषाशिक्षणस्य केन्द्रीयमहत्त्वमपि स्वीकरोति।

अस्याः दृष्टेः अनुरूपतया विद्यालयीयशिक्षायां राष्ट्रियपाठ्यचर्यारूपरेखा–२०२३ (NCF–SE 2023) त्रिभाषासूत्रस्य अनुशंसानुसारं भाषाध्ययनस्य महत्त्वं विशेषरूपेण प्रतिपादयति। सा प्रतिपादयति यत् भारतस्य स्वदेशीयभाषाः विद्यालयपाठ्यक्रमस्य माध्यमेन शिक्षार्थिभ्यः सुलभाः कर्तव्याः। एतादृशः उपायः शिक्षार्थिनां बौद्धिकविकासं पोषयति, सांस्कृतिकस्वरूपं दृढीकरोति, तेषां समग्रविकासं च सम्यक् समर्थयति।

राष्ट्रियपाठ्यचर्यारूपरेखा (NCF) अस्माकं सर्वान् विद्यार्थिनः न्यूनातिन्यूनतया तिस्रः भाषाः अधिगन्तुं समर्थान् कर्तुम् अभिप्रैति, अस्माकं सामाजिक-सांस्कृतिकपरिवेशस्य संसाधनानाञ्च पूर्णतया सदुपयोगं कर्तुम् उत्सहते। भारतीयाः भाषाः अस्माकं महतीषु संस्कृतिषु परम्परासु च अन्यतमाः सन्ति। शिक्षाव्यवस्थया सम्यक् समर्थिते सति एषा पाठ्यचर्या विद्यार्थिभ्यः नैकभाषाध्ययनस्य अद्वितीयमवसरं प्रददाति। अपरञ्च, अस्यां रूपरेखायाम् एतदपि निर्दिश्यते यद् एतासां तिसृणां भाषाणां — R1, R2, R3 — मध्ये न्यूनातिन्यूनतया द्वे भाषे भारतस्य स्वदेशीयभाषे भवेताम्। विद्यार्थिभ्यः R1, R2, R3 इति भाषाणां विकल्पान् राज्यसर्वकारः अन्याः सम्बन्धिताः संस्थाः वा निर्धारयिष्यन्ति।

सर्वेषां विद्यार्थिनां रुचीनाम् आवश्यकतानाञ्च पूर्त्यर्थं, पठनाभिरुचेः संवर्धनार्थं च, R1, R2, R3 इति तिसृषु भाषासु सार्थकशैक्षणिकसहायताप्रदानार्थं विविधाः संसाधनसामग्र्यः अपेक्षिताः भवन्ति।

इयं नवमकक्षायाः अधिगम-सामग्री R3 - भाषाणां शिक्षणाधिगमप्रक्रियायाः समर्थनार्थं विकासिता अस्ति। अस्यां तत्तद्भाषागतानाम् अपूर्ववैशिष्ट्यानां समावेशेन सहैव विविधवाङ्मयविधासु प्रतिबिम्बितस्य भारतीयजीवनपरिवेशस्य परिचयोऽपि प्रदत्तो विद्यते। अस्याः सामग्र्याः माध्यमेन शिक्षार्थिनः ज्ञानम् अर्जयेयुः, सर्जनात्मकतां समालोचनात्मकचिन्तनशक्तिं च संवर्धयेयुः, भारतस्य संस्कृत्या परम्परया च प्रगाढं सम्बन्धम् अवाप्नुयुः इति अपेक्ष्यते। आभ्यः सामग्रीभ्यः

© NCERT not to be republished

पाठ्यचर्यालक्ष्यानुरूपं तथा च राष्ट्रियशिक्षानीतेः २०२० राष्ट्रियपाठ्यचर्यारूपरेखायाः विद्यालयीयशिक्षायै–२०२३ दृष्टेः अनुरूपं च समावेशिन्याः बहुभाषिकशिक्षायाः अनुकूलशैक्षणिकपरिवेशनिर्माणस्य अपेक्षा वर्तते।

R3-भाषाधिगमस्य विशिष्टानि पाठ्यचर्यालक्ष्याणि सम्प्रेषणसामर्थ्यस्य विकासे भाषासाहित्ययोः रसास्वादनस्य अभिवर्धने च केन्द्रितानि सन्ति। माध्यमिकस्तरे R3-भाषायाः अनुशंसिताः शिक्षणोपायाः श्रवण-वाचन-लेखनकौशलानां मौखिकसम्प्रेषणसामर्थ्यस्य अभिवृद्धिं च लक्ष्यीकुर्वन्ति। अधिगमसामग्री यथासम्भवं R1 तथा R2-भाषयोः अधिगमलक्ष्यैः अनुरूपतां वहन्ती आवश्यकानां भाषिकसाहित्यिककौशलानां विकासं साधयितुमपेक्ष्यते।

वयं विद्यार्थिनां विविधपरिवेशानाम् आवश्यकतानाञ्च पूर्त्यर्थं R1, R2 तथा R3 इति भाषासु विविधाधिगम-सामग्री–प्रदानस्य स्वप्रयासं निरन्तरं प्रवर्तयामः।

R3-अधिगम-सामग्र्याः विकासे शिक्षामन्त्रालयेन घटितस्य उच्चस्तरीयकार्यदलस्य (High-Powered Task Force) माननीयैः सदस्यैः प्रदत्तेभ्यः अमूल्येभ्यः मार्गदर्शनेभ्यः सहयोगाय च वयं तान् कृतज्ञतापूर्वकं स्मरामः।

R3-भाषासु संस्कृतस्य कृते नवमकक्षायाः अधिगम-सामग्र्याः विकासे ये अमूल्यं साहाय्यं व्यतरन्, तेभ्यः सर्वेभ्यः वयं हार्दां कृतज्ञतां प्रकटयामः। अस्याः सामग्र्याः माध्यमेन शिक्षार्थिनः स्वस्य भाषिकसम्पदं संवर्धयिष्यन्ति इति वयम् आशास्महे। अध्यापकाः संरक्षकाश्चापि स्वदेशीयभाषाभिः शिक्षार्थिनः परिचितान् कर्तुम् एतां सामग्रीम् उपयुक्त–संसाधनरूपेण मन्येरन्।

आगामिषु वर्षेषु अस्याः सामग्र्याः परिष्कारार्थं सर्वेभ्यः उपयोगकर्तृभ्यः समुचितसूचनानां वयं सादरं स्वागतं कुर्मः।

प्रो. दिनेशप्रसादःसकलानी
*निदेशकः*
राष्ट्रिय–शैक्षिक–अनुसंधान और प्रशिक्षण–परिषद्

जून २०२६
नवदेहली

© NCERT not to be republished

# अधिगम-सामग्र्याः उपयोगविधिः

इयम् अधिगम-सामग्री नवमकक्षायाः आर्–३ भाषायाः अध्यापन-अधिगमयोः साहाय्यार्थं निर्मिता अस्ति। इयं शिक्षकाणां विद्यार्थिनां च कृते अधिगमसंसाधनरूपेण परिकल्पिता अस्ति, येन ते सम्प्रेषणकौशलस्य, पठनबोधनशक्तेः, लेखनक्षमतायाः, साहित्यरसास्वादनस्य, भाषाजागरूकतायाः भाषायाः सांस्कृतिकवैशिष्ट्यपरिचयस्य च विकासं कर्तुं शक्नुयुः।

राष्ट्रियशिक्षानीतिः–२०२० बहुभाषिकशिक्षायाः, भारतदेशस्य भाषाणां संवर्धनं, शिक्षार्थिनां समग्रविकासस्य पाठ्यक्रमे सार्थकभाषाधिगमस्य महत्त्वञ्च रेखाङ्कितं करोति। सा एव बहुभाषिकतायाः, राष्ट्रियैक्यस्य, भारतस्य भाषिकवैविध्यसम्मानस्य च संवर्धनार्थं त्रिभाषासूत्रस्य महत्त्वमपि पुनः प्रतिपादयति।

अस्याः दृष्टेः अनुरूपतया विद्यालयीयशिक्षायाः राष्ट्रियपाठ्यचर्यापरिप्रेक्ष्यम्–२०२३ विद्यालयीयशिक्षायाः विविधेषु सोपानेषु भाषाधिगमस्य महत्त्वम् उद्घाटयति तथा च मध्यस्तरे माध्यमिकस्तरे च आर्–१ (R1), आर्–२ (R2) तथा आर्–३ (R3) भाषाणां शिक्षणार्थं पाठ्यचर्यालक्ष्याणि दक्षताश्च निर्दिशति। विद्यालयीयपाठ्यक्रमे आर्–१ आर्–२ तथा आर्–३ इति एतास्तिस्रो भाषाः समवेतरूपेण शिक्षार्थिनां बहुभाषिकविकासे महत्त्वपूर्णं योगदानं कुर्वन्ति।

भाषाशिक्षायाः त्रिभाषाधिगमस्य विषये अधिकं ज्ञातुं राष्ट्रियपाठ्यचर्यापरिप्रेक्ष्यस्य विद्यालयशिक्षा–२०२३ इत्यस्य द्वितीयाध्यायः—'भाषाशिक्षा' (पृष्ठसङ्ख्या २१५–२४७), यः रा.शै.अ.प्र.प. द्वारा प्रकाशितः अस्ति, सः अवलोकनीयः। सः निम्नलिखिते जालसम्पर्के (weblink) उपलब्धः अस्ति— https://ncert.nic.in/pdf/NCFSE2023_May2026.pdf

अतः आर्–३ (R3) भाषायाः अधिगमः पृथक्–दृष्ट्या न द्रष्टव्यः। सः राष्ट्रियशिक्षानीतेः २०२० तथा च विद्यालयीयशिक्षायाः राष्ट्रियपाठ्यचर्यापरिप्रेक्ष्यस्य–२०२३ व्यापकबहुभाषिकदृष्टेः अभिन्नः अंशः अस्ति, यत्र शिक्षार्थिनः विभिन्नभाषासु, संस्कृतिषु ज्ञानपरम्परासु च आदरभावं विकासयितुं प्रोत्साह्यन्ते।

अपरस्याः भारतीयभाषायाः अधिगमः शिक्षार्थिभ्यः भारतस्य विविधैः प्रदेशैः, समुदायैः, मौखिकपरम्पराभिः, साहित्यरूपैः जीवनपद्धतिभिः च सह सम्बन्धं स्थापयितुं साहाय्यं करोति। एषः भाषाणां तुलनात्मकम् अवगमनम्, भाषिकप्रतिमानानां बोधनं, भारतस्य बहुभाषिकपरम्परायाः प्रशंसनक्षमतां च दृढयति।

© NCERT not to be republished

माध्यमिकस्तरे आर्–३ (R3) भाषायाः पाठ्यचर्यालक्ष्याणि दक्षताः च शिक्षार्थिनां पाठबोधनं, पाठसारलेखनम्, मौखिक-लिखितरूपेण प्रभाविसम्प्रेषणम्, साहित्यस्य विविधरूपाणां रसास्वादनम्, अर्थपूर्णसन्दर्भेषु भाषायाः मूलभूतवैशिष्ट्यानां परिचयं तथा तेषां समुचितप्रयोगं च विकासयितुं केन्द्रितानि सन्ति।

अतः इयं शिक्षण-सामग्री श्रवण-भाषण-पठन- लेखनकौशलविकासाय, साहित्यरसास्वादनाय, शब्दसम्पद्वर्धनाय, सन्दर्भानुकूलव्याकरणप्रयोगाय सर्जनात्मकाभिव्यक्तेः अवसरप्रदानाय च अभिकल्पिता अस्ति।

भाषाधिगमः शिक्षार्थिनां समग्रविकासस्य महत्त्वपूर्णम् अङ्गम् अस्ति। सः प्रभाविरूपेण सम्प्रेषणं कर्तुं, चिन्तयितुं, स्वविचारान् अभिव्यङ्क्तुं, साहित्यस्य रसास्वादनं कर्तुं, संस्कृतिम् अवगन्तुं समाजे सार्थकरूपेण सहभागित्वं निर्वोढुं च तान् समर्थान् करोति।

प्रत्येकं भाषा तस्याः उपयोगकर्तृसमुदायस्य विश्वदृष्टिं, जीवनानुभवान्, ज्ञानपरम्पराः सांस्कृतिकाभिव्यक्तीः च प्रतिबिम्बयति। भारतस्य बहुभाषिक-बहुसांस्कृतिकपरिवेशः शिक्षार्थिभ्यः भाषिकवैविध्यस्य सम्मानभावं विकासयितुं तथा च विभिन्नप्रदेशैः, समुदायैः, अभिव्यक्तेः विविधरूपैश्च सह सम्बन्धं स्थापयितुं समृद्धान् अवसरान् प्रददाति।

इयं सामग्री कक्षायां नमनीयतया सन्दर्भानुकूलतया च उपयोक्तुं शक्यते। शिक्षकाः मौखिकसम्भाषणेन, परिचितपदैः, सरलाभिव्यक्तिभिः, गीतैः, कथाभिः, कविताभिः, संवादैः, चित्रैः स्थानीयसन्दर्भानुकूलोदाहरणैः च अध्यापनम् आरब्धुं शक्नुवन्ति। शिक्षार्थिनः कण्ठस्थीकरणस्य अपेक्षया अर्थपूर्णक्रियाकलापैः श्रवण-भाषण-पठन- लेखनकौशलानि विकासयितुं प्रोत्साहनीयाः।

अस्यां सामग्र्यां चर्चा, भूमिकानिर्वाहः (Role Play), कवितापाठः, नाट्यरूपान्तरणम्, चित्रवाचनम्, शब्दसम्पद्वर्धनम्, सर्जनात्मकाभिव्यक्तिः, सस्वरपठनम्, लघुसन्देश–पत्र-वर्णन–सरलकथादिलेखनम् इत्यादिनां पर्याप्ताः अवसराः प्रदत्ताः सन्ति।

अस्यां सामग्र्यां सङ्गृहीतानि पाठ्यानि शिक्षार्थिनः कथा-कविता-गद्यांश-संवादैः अन्यैश्च लेखनरूपैः परिचितान् कर्तुं साहाय्यं कुर्वन्ति। एतानि पाठ्यानि भाषासम्बद्धस्य सामाजिक-सांस्कृतिक-प्रादेशिकानां चापि जीवनानां परिचयं ददति।

शिक्षकाः पाठानां विषयैः सम्बद्धानि प्रामाणिकचित्राणि, स्थानीयगीतानि, लोकसाहित्यम्, मौखिकपरम्पराः, मानचित्राणि, कला, शिल्पम्, श्रव्यदृश्यसामग्रीम् अन्यानि विश्वसनीयसंसाधनानि च उपयुज्य कक्षाशिक्षणम् अधिकं समृद्धं कर्तुं शक्नुवन्ति।

© NCERT not to be republished

इयं शिक्षण-सामग्री बहुभाषिकाधिगमस्य कृते अपि पर्याप्तम् अवसरं प्रददाति। शिक्षार्थिनः आर्–३ (R3) भाषायाः तैः पूर्वमेव अधिगतानां भाषाणां च, विशेषतः आर्–१ (R1) तथा आर्–२ (R2) भाषयोः मध्ये सम्बन्धं स्थापयितुं प्रोत्साहनीयाः। बोधनस्य, शब्दसम्पद्विकासस्य, लिपिपरिचयस्य, अभिव्यक्तेः च समर्थनार्थं शिक्षकाः शिक्षार्थिनां मातृभाषाम् अन्यां परिचितभाषां वा उपयोक्तुं शक्नुवन्ति।

यथायोग्यं बहुभाषिकशब्दकोशाः, सन्दर्भसामग्री, शब्दसारिण्यः सरलाः तुलनात्मकभाषायाः क्रियाकलापाः चापि उपयोक्तुं शक्यन्ते।

अस्यां सामग्र्यां समाविष्टानि चित्राणि दृश्यतत्त्वानि च शिक्षणोपकरणरूपेण उपयोक्तव्यानि। विशेषतः यदा शिक्षार्थिनः नवीनभाषायाः नूतनलिपेः वा परिचयं प्राप्नुवन्ति, तदा एतानि श्रवण-भाषण-पठन-लेखनकौशलविकासे सहायकरूपेण कार्यं कुर्वन्ति।

शिक्षकाः शिक्षार्थिनः चित्रवर्णनं कर्तुं, वस्तूनि परिचेतुं, संवादान् रचयितुं, घटनाः कथयितुं, कथायाः सम्भावितक्रमस्य अनुमानं कर्तुम् अथवा चित्राधारितानि लघूत्तराणि लेखितुं प्रोत्साहयितुं शक्नुवन्ति।

कक्षाशिक्षणगताः क्रियाकलापाः सर्वसमावेशिनः सहभागिताप्रधानाश्च भवितुमर्हन्ति। भाषापरिचयस्य, अधिगमगतिविशेषस्य अधिगमावश्यकतानां विविधस्तरयुक्तेभ्यः च शिक्षार्थिभ्यः सार्थकरूपेण सहभागित्वस्य पर्याप्ताः अवसराः प्रदातव्याः। विशेषसहायताम् अपेक्षमाणेभ्यः शिक्षार्थिभ्यः आवश्यकतानुसारम् अतिरिक्तसाहाय्यमपि प्रदातुं शक्यते।

शिक्षकाः क्रियाकलापान् सन्दर्भानुकूलतया परिवर्तयितुं, सहपाठिसहयोगस्य व्यवस्थां कर्तुं, दृश्यसहायकसामग्रीम् उपयोक्तुं, निर्देशान् पुनः पुनः स्पष्टीकर्तुं, शिक्षार्थिभ्यः बहुविधानि उत्तरप्रदर्शनमार्गाणि प्रदातुं च शक्नुवन्ति।

मूल्याङ्कनं कक्षाशिक्षणप्रक्रियायाः अभिन्नाङ्गरूपेण समन्वितं भवेत् तथा च तत् सम्बद्धैः पाठ्यचर्यालक्ष्यैः दक्षताभिश्च समन्वितं स्यात्। मूल्याङ्कनस्य मुख्यलक्ष्यं शिक्षार्थिनां सरलार्थपूर्णसन्दर्भेषु भाषाम् अवगन्तुं, सम्प्रेषयितुं, समुचितरूपेण उपयोक्तुं सामर्थ्यस्य च परीक्षणं भवेत्।

मूल्याङ्कनक्रियासु मौखिकप्रत्युत्तराणि, कथावाचनम्, चित्रवर्णनम्, पठनबोधनम्, लघुलेखनकार्यम्, भूमिकानिर्वाहः, समूहकार्यं, प्रस्तुतीकरणम्, सर्जनात्मकलेखनम् सञ्चिकामूल्याङ्कनं च (Portfolio) समावेश्यन्ते। व्याकरणस्य शब्दसम्पदश्च मूल्याङ्कनं सन्दर्भानुसारं करणीयम्, न तु पृथग्रूपेण। तथ्यान्वेषणात्मकप्रश्नानाम् अनुमानात्मकप्रश्नानां च मध्ये समुचितं सन्तोलनम् अपि साधनीयम्।

शिक्षकाः शिक्षार्थिनश्च एतां सामग्रीम् आरम्भबिन्दुरूपेण स्वीकृत्य भाषायाः, साहित्यस्य, संस्कृतेः च सम्बद्धानि वयोऽनुकूलानि प्रामाणिकानि च अन्यानि संसाधनानि अन्वेष्टुं प्रोत्साह्यन्ते।

एषा सामग्री आकर्षकं, सर्वसमावेशिनं, बहुभाषिकं शिक्षार्थिकेन्द्रितं च कक्षापरिवेशं निर्मातुम् उपयोक्तुं शक्यते।

© NCERT not to be republished

# भूमिका

**"संस्कृतं सदा सर्वान् संस्कृतान् कुरुतेतराम्"**

भारतीयज्ञानपरम्परायाः संवाहिका, संस्कृतिसंरक्षिका, मूल्यशिक्षायाः आधारभूता च संस्कृतभाषा विश्वस्य प्राचीनतमासु समृद्धतमासु च भाषासु अन्यतमा अस्ति। एषा भाषा न केवलं संवादसाधनं अपितु भारतीयदर्शनस्य, विज्ञानस्य, साहित्यस्य, संस्काराणां च अमूल्यनिधिः अस्ति। भाषेयं सर्वैः भारतीयैः अवश्यमेव पठनीया मननीया च।

राष्ट्रियशिक्षानीतिः–२०२० (NEP 2020), तदाधारिता च राष्ट्रियपाठ्यचर्यारूपरेखा–२०२३ (NCF–२०२३) भारतीयभाषाणां समानमहत्त्वं स्वीकृत्य बहुभाषिकतायाः संवर्धनं प्रोत्साहयति। वयं जानीमः यत् भारतं विविधाभिः भाषाभिः अनेकाभिश्च संस्कृतिभिः विभूषिता अस्ति। अतः विद्यालयीयशिक्षायाम् ईदृशी व्यवस्था भवितव्या यया विद्यार्थिनः आत्मनः भाषिकपरिवेशात् बहिर्गत्वा अन्यासां भाषाणाम् अधिगमं कर्तुं शक्नुयुः।

तदनुसारं प्रत्येकं कक्षायां तृतीयभाषारूपेण (R–३) सर्वासां भारतीयभाषाणामध्ययनस्य व्यवस्था विहिता अस्ति। एतस्यैव उद्देश्यस्य पूर्त्यर्थं विविधासु भारतीयभाषासु अधिगमसामग्री (Learning Resource Material) विकासिता अस्ति। संस्कृते अपि 'इरावती'-नाम्नी अधिगमसामग्री निर्मिता या विद्यार्थिनां नूतनभाषायाः अधिगमे सहायिका स्यात्।

सरलया सरसया च भाषया रचिता एषा सामग्री विद्यार्थिनः संस्कृतभाषायाः मौलिकतत्त्वैः परिचाययति तेभ्यश्च च संस्कृताध्ययनस्य दृढमाधारं ददाति। एषा मौलिकसंवादकौशलस्य, शब्दसंपद्विकासस्य, श्रवण-वाचन-कौशलस्य, प्रारम्भिकपठनलेखनाभ्यासस्य च अवसरं ददाति।

*इरावती* नाम्न्याम् अस्याम् अधिगमसामग्र्यां एकादश पाठाः समाविष्टाः सन्ति। तेषु एकं गीतम्, तिस्रः कथाः, त्रयः वर्णनात्मकनिबन्धाः, एकं नाट्यं, त्रयः श्लोकात्मकपाठाश्च सन्ति। एतेषु पाठेषु सरलाः कथाः, प्रेरकाः श्लोकाः, नीतिकथाः, वैज्ञानिकविषयाः, ऋतुवर्णनम्, स्वास्थ्यसंरक्षणसम्बद्धाः विषयाः, जलस्रोतसां परिचयः, दानशीलता, परोपकारः, विद्यायाः महत्त्वम् इत्यादयः जीवनगुणाः च समुचितरूपेण प्रस्तुताः सन्ति। एते पाठाः विद्यार्थिभ्यः न केवलं भाषाज्ञानं ददति, अपितु तेषां मनस्सु नैतिकगुणानां विकासमपि कुर्वन्ति।

अस्यां सामग्र्यां संस्कृतसाहित्यस्य रुचिविवर्धकाः प्रसङ्गाः, नीतिश्लोकाः, प्रेरणादायककथाः च एतत् प्रतिपादयन्ति यत् संस्कृतभाषा अद्यापि सर्वेभ्यः उपयोगिनी अस्ति। भाषायाः अस्याः

© NCERT not to be republished

प्रासङ्गिकता भाषामिमाम् अन्याभ्यः भाषाभ्यः पृथक् करोति। पाठनिर्माणकाले शिक्षणप्रक्रियां सुगमां कर्तुं प्रत्येकं पाठे प्रयुक्तानां शब्दानां संस्कृतपर्यायाः, हिन्दी-आङ्ग्लभाषयोः अर्थाः च प्रदत्ताः सन्ति। तदतिरिच्य विद्यार्थिभ्यः स्वमातृभाषायामपि शब्दार्थलेखनस्य अवसरः प्रदत्तः अस्ति, येन तेषु बहुभाषिकतां प्रति सम्मानभावः आविर्भवति तथा च संस्कृतभाषायाः अन्यभाषाभिः सह सम्बन्धज्ञानमपि भवति।

पाठान्ते विषयावबोधपरीक्षणाय निर्मितानाम् अभ्यासप्रश्नानां भाषा अतीव सरला अस्ति। शिक्षार्थिनां सौविध्यार्थं प्रत्येकं प्रश्नस्य आरम्भे उदाहरणानि अपि प्रदत्तानि सन्ति। "अवधेयम्" इत्यंशे पाठेषु प्रयुक्तानां केषाञ्चन व्याकरणतत्त्वानां संक्षिप्तः परिचयः प्रदत्तः अस्ति। शिक्षार्थिनां जिज्ञासानां शमनार्थं परिशिष्टभागे आधारभूतव्याकरणस्य, वाक्यरचनायाश्च प्रमुखनियमाः अपि संक्षिप्तरूपेण समाविष्टाः सन्ति।

राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा अपेक्षा क्रियते यत् अस्याः अधिगमसामग्र्याः अध्ययनेन विद्यार्थिनां पठन-लेखन-श्रवण-भाषणरूपाणां चतुर्णां भाषाकौशलानां समुचितः विकासः भविष्यति। पाठानां पठनेन संस्कृतभाषायां तेषां रुचिः, आत्मविश्वासः, अभिव्यक्तिक्षमता च वर्धिष्यते इति विश्वासः। पाठस्य प्रेष्यसन्देशम् अवबुध्य पाठाधारितस्य प्रश्नस्य उत्तरप्रदानं छात्राः अनायासमेव कर्त्तुं शक्नुवन्ति इति च अपेक्ष्यते। अभ्यासकार्येषु विविधता विद्यते। अभ्यासान्ते अनेके मनोरञ्जकाः क्रियाकलापाः प्रदत्ताः सन्ति ये छात्राणां सर्जनात्मककौशलविवर्धनाय सहायकाः सन्ति।

*इरावती*-नाम्नी एषा शिक्षण-सामग्री ज्ञानिभिः अनुभवसम्पन्नैश्च शिक्षकैः भाषाविद्भिश्च विकासिताभवत्। अस्याम् पाठ्यचर्यासम्बद्धदृष्टिः, वयोनुकूलता, भाषाविकासस्य प्रचुरः अवसरः, विषयोपयुक्तता, समावेशिता, सर्जनात्मिकाः च क्रियाः समाविष्टाः सन्ति।

एषा शिक्षणसामग्री शिक्षार्थिभ्यः अध्यापकेभ्यः च उपकारिणी भविष्यति इति आशास्महे। अस्याः पुस्तिकायाः स्तरोन्नयनाय, परिमार्जनाय गुणवर्धनाय च विदुषां शिक्षाशास्त्रविशारदानां च उपयोगी परामर्शः सादरं स्वागतार्हः। तेषां रचनात्मकैः परामर्शैः एषा सामग्री भविष्ये अधिकोपयोगिनी, अधिकसमृद्धा च भविष्यति।

समन्वयकः

जतीन्द्र-मोहन-मिश्रः
*आचार्यः*, भाषाशिक्षाविभागः
रा.शै.अ.प्र.प., नवदेहली

© NCERT not to be republished

# पाठ्य-सामग्री निर्माण-समितिः

अंकित-सिंह-यादवः, *सहायकाचार्यः*, संस्कृतम्, लक्ष्मीबाईमहाविद्यालयः, दिल्लीविश्वविद्यालयः, नवदेहली

अजय-गोग्यानः, *टी.जी.टी.-संस्कृतम्*, एस.बी-एस. सीएम-श्री. विद्यालयः, झाड़ौदाकलाँ नजफगढ़ः, नवदेहली

अवनीशधर-द्विवेदी, *टी.जी.टी.-संस्कृतम्*, रा.स.बा. विद्यालय, जे.जे. कॉलोनी, खिचड़ीपुरम्, नवदेहली

आभा-झा, *पी.जी.टी.-संस्कृतम्* (सेवानिवृतः), गार्गी-सर्वोदय-कन्या-विद्यालयः, ग्रीनपार्कः, नवदेहली

आरती-झा, *टी.जी.टी.-संस्कृतम्*, पीएम-श्री केन्द्रीय-विद्यालयः, खिचड़ीपुरम्, नवदेहली

देवेश-शर्माः, *सहायकाचार्यः*, सेंट-जॉर्ज-इंस्टीट्यूट-ऑफ-एजुकेशन-फॉर-वीमेन, ग्रेटरनोएडा, उत्तरप्रदेशः

जयदेव-वीरः, *टी.जी.टी.-संस्कृतम्*, राजकीय-सर्वोदय-बाल-विद्यालयः रमेशनगरम्, नवदेहली

ज्योति-अग्रवालः, *टी.जी.टी.-संस्कृतम्*, डॉ.-भीमराव-अम्बेडकर सीएम-श्री विद्यालयः, सूरजमलविहारः, नवदेहली

धनञ्जय-कुमारः, *सहाचार्यः*, संस्कृतविभागः, दिल्लीविश्वविद्यालयः, नवदेहली

प्रदीप-कुमार-पाण्डेयः, *सहायकाचार्यः* डी.आई.ई.टी., मोतीबागः, नवदेहली

मनीष-शर्मा, *सहायकाचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नवदेहली

रानी-झा, *टी.जी.टी.-संस्कृतम्*, पीएम-श्री केन्द्रीय-विद्यालयः, जनकपुरी, नवदेहली

वाचस्पतिनाथः झा 'मणि', *सहायकाचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नवदेहली

विजय-कुमार-सिंहः, *टी.जी.टी.-संस्कृतम्*, सी.आर.पी.एफ. विद्यालयः, रोहिणी, नवदेहली

विनायक-हेगडे, *टी.जी.टी.-संस्कृतम्*, सी.आर.पी.एफ. विद्यालयः, रोहिणी, नवदेहली

सारुल-तिवारी, *टी.जी.टी.-संस्कृतम्*, सर्वोदय-कन्या-विद्यालयः, आनन्दविहारः, नवदेहली

© NCERT not to be republished

**समन्वयकः**

जतीन्द्र-मोहन-मिश्रः, *आचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नवदेहली

**सह-समन्वयकः**

देवकीनन्दनः, *सहायकाचार्यः*, भाषा-शिक्षा-विभागः, रा.शै.अ.प्र.प., नवदेहली

**समीक्षकौ**

भागीरथिनन्दः, *आचार्यः,* श्री-लालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयः, नवदेहली

विष्णुपदमहापात्रः, *आचार्यः,* श्री-लालबहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयः, नवदेहली

© NCERT not to be republished

# कृतज्ञता

राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद् नवमकक्षायाः कृते संस्कृतभाषायाः *इरावती* इति अधिगमसामग्रीप्रारूपस्य निर्माणार्थं निरन्तरं मार्गदर्शनस्य समर्थनस्य च प्रदानाय परिषद् संस्थायाः *संयुक्तनिदेशकं* प्रो. पी.सी. अग्रवालं, पाठ्यचर्या-अध्ययन-विकास-विभागस्य *अध्यक्षां* प्रो. रंजना-अरोड़ां तथा च भाषाशिक्षाविभागस्य *अध्यक्षं* प्रो. फारूक-अन्सारीं प्रति कृतज्ञतां ज्ञापयति। परिषदः भाषाशिक्षाविभागस्य *वरिष्ठ-शोधसहायकः,* बालमुकुंदः, *कनिष्ठ-परियोजना-अध्येतारः,* चाँदनी-शर्मा, प्रज्ञा-आर्या, नरेन्द्र-कुमार-सैनी, अनिलः, साहिल-शर्मा, प्रतीक-मिश्रः इत्येतैः पाठ्यपुस्तकस्य परीक्षणे प्रदत्तस्य सहयोगस्य कृते साधुवादः प्रदीयते। परिषद् पाठ्यपुस्तकस्य चित्राङ्कनार्थं तथा च अभिकल्पनायै 'एरीज डिजाइनिंग स्टूडियो' इत्यस्य योगदानमपि स्वीकृतमस्ति, तदर्थं तस्य कृते धन्यवादः।

अस्य पुस्तकस्य अन्तिम-स्वरूपस्य प्रदानाय प्रकाशनप्रभागं प्रति कृतज्ञतां ज्ञापयामः। पाठ्यपुस्तकस्य संपादने *सहायकसंपादिका* (संविदा) पारूलः त्यागी, *प्रूफरीडर* (संविदा) कमल-भाटी, आफरीन च प्रकाशन-प्रभागे डी.टी.पी. प्रकोष्ठस्य *प्रभारीणं* पवनकुमार-बरियारः, *डी.टी.पी. ऑपरेटर* (संविदा) बिट्टू-कुमारः महतो, विपनकुमार-शर्मा, उपासना इति एतेषां सर्वेषां प्रति धन्यवादान् समर्पयामः।

© NCERT not to be republished

# भारतस्य संविधानम्

## प्रस्तावना

**वयं, भारतस्य जनाः,**
**भारतं**
[**सम्पूर्णप्रभुत्वसम्पन्नं, समाजवादि, सम्प्रदायनिरपेक्षं, लोकतन्त्रात्मकं गणराज्यं विधातुं**][1]
तस्य समस्तान् नागरिकांश्च

सामाजिकम्, आर्थिकं, राजनीतिकं च – **न्यायं**,
विचारस्य, अभिव्यक्तेः,
आस्थायाः, धर्मस्य, उपासनायाश्च – **स्वतन्त्रतां**,
प्रतिष्ठायाः, अवसरस्य च – **समतां**
प्रापयितुं,
तेषु सर्वेषु च व्यक्तिगौरवस्य
[राष्ट्रस्य एकतायाः, अखण्डतायाश्च][2] सुनिश्चायिकां – **बन्धुतां**
वर्धयितुं;

कृतदृढसङ्कल्पाः
**अस्याम् अस्मदीयायां संविधानसभायाम्**
अद्य, ख्रिस्तीये १९४९-तमे वर्षे नवम्बर-मासस्य २६-तमे दिने
(२००६-तमे विक्रमसंवत्सरे मार्गशीर्षे शुक्लपक्षे सप्तम्यां तिथौ)
**एतेन इदं संविधानम् अङ्गीकृतम्, अधिनियमितम्, आत्मार्पितं च कुर्महे।**

---

१ संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २-अनुभागेन "सम्पूर्णप्रभुत्वसम्पन्नं लोकतन्त्रात्मकं गणराज्यम्" इति एतेभ्यः शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः।

२ उपर्युक्तस्य अधिनियमस्य उक्तेन अनुभागेन "राष्ट्रस्य एकतायाः" इति एताभ्यां शब्दाभ्यां प्रति एते शब्दाः संनिवेशिताः।

# पाठानुक्रमणिका


| | | | पृष्ठाङ्काः |
|---|---|---|---|
| *पुरोवाक्* | | | *i* |
| *भूमिका* | | | *vii* |
| १. | प्रथमः पाठः | अहं नमामि | 1 |
| २. | द्वितीयः पाठः | मातामह्याः उपनेत्रम् | 6 |
| ३. | तृतीयः पाठः | नद्यः | 15 |
| ४. | चतुर्थः पाठः | नीतिवचनानि | 22 |
| ५. | पञ्चमः पाठः | दानवीरः कर्णः | 33 |
| ६. | षष्ठ पाठः | न गङ्गदत्तः पुनरेति कूपम् | 41 |
| ७. | सप्तमः पाठः | विद्यामहिमा | 49 |
| ८. | अष्टमः पाठः | बिलस्य वाणी न कदापि मे श्रुता | 59 |
| ९. | नवमः पाठः | ऋतुः वसन्तः | 67 |
| १०. | दशमः पाठः | सहजः स्वास्थ्यलाभः | 75 |
| ११. | एकादशः पाठः | आर्यभटः | 85 |
| | परिशिष्टम् १ | संस्कृत-वर्णमाला | 92 |
| | परिशिष्टम् २ | शरीरस्य अङ्गानि | 94 |
| | परिशिष्टम् ३ | फलानां नामानि | 98 |
| | परिशिष्टम् ४ | संस्कृतमासानां नामानि | 101 |
| | परिशिष्टम् ५ | वर्णाः | 103 |
| | परिशिष्टम् ६ | संस्कृत-संख्याः १ तः १०० | 106 |
| | परिशिष्टम् ७ | वस्तु-परिचयः (त्रिषु लिङ्गेषु) | 109 |
| | परिशिष्टम् ८ | शब्दरूप-परिचयः | 112 |
| | परिशिष्टम् ९ | धातुरूपपरिचयः (क्रियारूपाणि) | 115 |
| | परिशिष्टम् १० | अव्ययानि | 119 |
| | परिशिष्टम् ११ | संस्कृत-वाक्यरचना | 122 |
| | परिशिष्टम् १२ | उच्चारण-स्थानानि | 125 |


© NCERT not to be republished

# राष्ट्र–गीतम्

***वन्दे मातरं, वन्दे मातरम्।***
***सुजलां सुफलां मलयज–शीतलाम्***
***शस्य–श्यामलां मातरम्,***
***वन्दे मातरम्॥***

***शुभ्र–ज्योत्स्ना–पुलकित–यामिनीम्***
***फुल्ल–कुसुमित–द्रुमदल–शोभिनीम्***
***सुहासिनीं सुमधुर–भाषिणीम्***
***सुखदां वरदां मातरम्,***
***वन्दे मातरं, वन्दे मातरम्॥***

सत्यमेव जयते

'वन्दे मातरम्' इति गीतं बङ्किमचन्द्र-चट्टोपाध्याय-महोदयेन रचितस्य काव्यस्य आदिमः अंशः अस्ति, यत् संस्कृत-भाषायां गुम्फितम् अस्ति। इदं गीतं स्वातन्त्र्य-संग्रामे भारतवासिभ्यः नितरां प्रेरणाप्रदम् आसीत्। २४.०१.१९५० – दिनाङ्के भारतस्य राष्ट्रपतिः डॉ. राजेन्द्र-प्रसादः संविधान-सभायाम् एवम् उद्घोषितवान् – " 'वन्दे मातरम्' यत् भारतस्य स्वातन्त्र्यान्दोलनस्य उद्दीपने काञ्चित् ऐतिहासिकीं भूमिकां निरूढवत्, तत् राष्ट्र-गानेन 'जन-गण-मन' इत्यनेन सह समानरूपेण सम्मानितं भविष्यति, समानं च महत्त्वं धारयिष्यति।"